Lahari-Bhitya NaukA Vai

લહરી-ભીત્યા નૌકા વૈ

Document Information

Text title : Lahari-Bhitya Nauka Vai Sanskrit translation of Hindi song laharoM se Darakara naukA

File name : laharIbhItyAnaukA.itx

Category : misc, sanskritgeet, hkmeher

Location : doc_z_misc_general

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : April 12, 2024

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2024

sanskritdocuments.org

લહરી-ભીત્યા નૌકા વૈ

("લહરોં સે ડરકર નૌકા" હિન્દી ગીતસ્ય સંસ્કૃતાનુવાદઃ)
લહરી-ભીત્યા નૌકા વૈ ગચ્છતિ નો પારમ્ ।
નાયાત્યુદ્યમ-નિરતાનાં કર્મસુ વિફલત્વમ્ ।
ઉદ્યમ-નિરતા ન લભન્તે સ્વપરાજય-ભારમ્ ॥ ૦॥

કણિકાં નીત્વા ચલતિ યદા લઘ્વી પિપીલિકા,
રોહતિ ભિત્તૌ સ્ખલતિ પરં શતવારં સૈકા ।
મનસો વિશ્વાસો ધમનૌ પૂરયતિ સાહસમ્,
રોહે પતનં પતને રોહો જનયતિ નો ખેદમ્ ।
અન્તે તસ્યાઃ શ્રમ-સર્વં યાતિ નહિ વ્યર્થમ્ ।
નાયાત્યુદ્યમ-નિરતાનાં કર્મસુ વિફલત્વમ્ ।
ઉદ્યમ-નિરતા ન લભન્તે સ્વપરાજય-ભારમ્ ॥ ૧॥

અવગાહી કુરુતે નૂનં નિમજ્જનં જલધૌ,
પ્રત્યાયાતિ ચ રિક્ત-કરો મુહુરપિ ગત્વાઽસૌ ।
સરલં ન લભ્યતે વૈ મુક્તા સલિલે સુગભીરે,
દ્વિગુણં વર્ધત ઉત્સાહો હ્યત્રોદ્વેગભરે ।
શૂન્યાગચ્છતિ ન તદીયા મુષ્ટિઃ પ્રતિવારમ્ ।
નાયાત્યુદ્યમ-નિરતાનાં કર્મસુ વિફલત્વમ્ ।
ઉદ્યમ-નિરતા ન લભન્તે સ્વપરાજય-ભારમ્ ॥ ૨॥

અસફલતા ત્વેકાહ્વાનં, તત્ સ્વીકુરુ નૂનમ્,
પશ્યાભાવઃ કો જાતઃ, સમ્માર્જયાધિકમ્ ।
નાપ્તં યાવત્ સફલત્વં, નિદ્રાં ત્યજ સૌખ્યમ્ ।
સઙ્ઘર્ષાઙ્ગણમિહ હિત્વા ન પલાયેથાસ્ત્વમ્ ।
લભ્યઃ કિઞ્ચિત્ કૃતં વિના, જયકારો નૈવમ્ ।
નાયાત્યુદ્યમ-નિરતાનાં કર્મસુ વિફલત્વમ્ ।

ઉદ્યમ-નિરતા ન લભન્તે સ્વપરાજય-ભારમ્ ॥ ૩॥

મૂલ હિન્દી

લહરોં સે ડરકર નૌકા પાર નહીં હોતી ।
કોશિશ કરનેવાલોં કી હાર નહીં હોતી ।
કોશિશ કરનેવાલોં કી હાર નહીં હોતી ॥ ૦॥

નન્હીં ચીંટી જબ દાના લેકર ચલતી હૈ,
ચઢ઼તી દીવારોં પર, સૌ બાર ફિસલતી હૈ ।
મન કા વિશ્વાસ રગોં મેં સાહસ ભરતા હૈ,
ચઢ઼કર ગિરના ગિરકર ચઢ઼ના ન અખરતા હૈ ।
આખિર ઉસકી મેહનત બેકાર નહીં હોતી ।
કોશિશ કરનેવાલોં કી હાર નહીં હોતી ।
કોશિશ કરનેવાલોં કી હાર નહીં હોતી ॥ ૧॥

ડુબકિયાઁ સિન્ધુ મેં ગોતાખોર લગાતા હૈ,
જા જાકર ખાલી હાથ લૌટકર આતા હૈ ।
મિલતે નહીં સહજ હી મોતી ગહરે પાની મેં,
બઢ઼તા દુગુના ઉત્સાહ ઇસી હૈરાની મેં ।
મુટ્ઠી ઉસકી ખાલી હર બાર નહીં હોતી ।
કોશિશ કરનેવાલોં કી હાર નહીં હોતી ।
કોશિશ કરનેવાલોં કી હાર નહીં હોતી ॥ ૨॥

અસફલતા એક ચુનૌતી હૈ સ્વીકાર કરો,
ક્યા કમીં રહ ગયી દેખો, ઔર સુધાર કરો ।
જબ તક ન સફલ હો નીંદ ચૈન કો ત્યાગો તુમ,
સંઘર્ષ કા મૈદાન છોડ઼ મત ભાગો તુમ ।
કુછ કિયે બિના હી જય-જયકાર નહીં હોતી ।
કોશિશ કરનેવાલોં કી હાર નહીં હોતી ।
કોશિશ કરનેવાલોં કી હાર નહીં હોતી ॥ ૩॥

લહરોં સે ડરકર નૌકા (હિન્દી ગીત)
મૂલ-રચયિતા - કવિ સોહનલાલ દ્વિવેદી
સંસ્કૃત-ગીતાનુવાદકઃ - ડૉ. હરેકૃષ્ણ-મેહેરઃ

Laharon Se Darkar Nauka (Hindi song)

Original Lyrics by : Poet Sohanlal Dwivedi

Sanskrit Version Lyrics by : Dr. Harekrishna Meher

Copyright - Dr. Harekrishna Mehera

Lahari-Bhitya NaukA Vai

pdf was typeset on April 12, 2024

Please send corrections to *sanskrit@cheerful.com*